# Svami Abhedananda Ashtakam

# स्वामिअभेदानन्दाष्टकम्

## Document Information

Text title : Svami Abhedananda Ashtakam

File name : svAmiabhedAnandAShTakam.itx

Category : deities_misc, gurudev, rAmakRiShNa, aShTaka

Location : doc_deities_misc

Author : Brahmachari Medhachaitanya

Proofread by : Aruna Narayanan

Description-comments : rAmakRiShNastotramAlA, stavanAnjali

Acknowledge-Permission: Ramakrishna Shivananda Mission, Varasat

Latest update : June 12, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 12, 2023

*sanskritdocuments.org*

# स्वामिअभेदानन्दाष्टकम्

समाधियोगेन किशोरभूतस्त्वं सिद्धिमास्थाय विरक्तिमूलाम् ।
श्रीरामकृष्णस्य विशुद्ध पादान्तिकं गतोऽसि प्रविविक्तचेताः ॥ १॥

कालीतपस्वीति यशोंऽशुमाला विस्तीर्णतां श्रीभगवत्प्रियेषु ।
गता वतेयं धवला मनस्विस्थिता तव श्वेतमहोर्मितुल्या ॥ २॥

प्रतीच्यदेशेषु विवेकदेवैराकारितो द्वैधविहीनभावः ।
गतः प्रचारार्थमभयं त्वमेको वेदान्तधर्मस्य महता बलेन ॥ ३॥

श्रीरामकृष्णस्तवनं विरच्य प्राप्ता जनन्यास्त्ववचेयमाशीः ।
कण्ठे वसस्त्वस्य सरस्वती सा धन्यः प्रसादेन ततोऽम्बिकायाः ॥ ४॥

अद्वैततत्त्वाधिगमेन देव श्रीरामकृष्णस्य विशेषमारात् ।
माहात्म्यमेत्य क्रियते प्रचारस्त्वया स्म शुद्ध प्रभुदेव सत्यम् ॥ ५॥

सत्यश्चिदानन्दमयोऽयमात्माऽभेदोपलक्ष्यो यत एव तत्त्वम् ।
अन्वर्थनामा जगति प्रसिद्धस्त्वमेव मत्वाऽन्यदपास्य सर्वम् ॥ ६॥

नानागुणानां समुपाश्रयोऽपि ज्ञानैरनल्पैः समलङ्कृतस्त्वम् ।
शक्त्या महत्या विभूषितश्चाऽहङ्कारलेशे न विवर्जितात्मा ॥ ७॥

नमोऽस्तु राजगणार्चिताभ्यां लोकेऽपि दुर्दर्शसुदुर्लभाभ्याम् ।
विराजितारिव्यसनोपमाभ्यां भक्तैः समाराधितपद्युगाभ्याम् ॥ ८॥

इति ब्रह्मचारिमेधाचैतन्यविरचितं “स्वामिअभेदानन्दाष्टकम्” सम्पूर्णम् ।
प्रणाममन्त्रः-
शास्त्रज्ञाय प्रशान्ताय वेदान्तप्रतिपादिने ।
नमोऽस्त्वभेदपादाय ज्ञानविज्ञानदीप्तये ॥

Proofread by Aruna Narayanan

*Svami Abhedananda Ashtakam*

pdf was typeset on June 12, 2023

Please send corrections to *sanskrit@cheerful.com*